II. *Upodghátapáda*. 7. De kalparum computatione, et de intercalatione inter Pádmakalpam et Váráhakalpam facienda. 8. De creatione a Brahmaṇe facta. De aevo aureo et argenteo. Ordinum quatuor origo, eorumque officia. 9. Deorum, gigantum, mundi creatio. Brahmanis ira Rudra (ardhanárínaravapus) creatur, hujus ex ore Uma procedit. Cujus synonyma enumerantur. 10. Brahman, quum corpus in duas partes divisisset, altera Purusha, altera Ṣatarúpá facta est. De horum, Brahmaṇis filiorum, Ṣivae et Satis prole. Ṣivae cultus quinque rebus innititur: spiritus coercitione (eaque triplex: *manda, madhyama, uttama*)[2], meditatione, sensuum a rebus externis revocatione, animi intentione, recordatione[3]. 11 (fol. $34^b$ = B. $32^a$). De spiritus coercitione. Qua quadruplex fructus obtineri dicitur 1. *ṣánti*, quies, flagitiorum, sive propriorum sive a majoribus transmissorum, sedatione effecta, 2. *praṣánti*, tranquillitas, quae libidinibus refrenandis cernitur, 3. *dípti*, splendor, quo gradu ad sapientiam et potestatem prope divinam pervenitur, 4. *prasáda*, serenitas, quae ex absoluta rerum externarum omnium oblivione procedit. Spiritus coercendi ratio adumbratur. 12. Ad perfectionem (siddhi) obtinendam impedimenta (upasarga) quaedam removenda sunt, quae numinis contemplationi interveniunt. Primum enim mystae ad metam properanti imagines mirae, velut dei, obversantur. Deinde a terra, intellectu, aqua, igne, vento, aëre, mente, quae septem subtilissimae substantiae sunt, pericula ei afferuntur. Quas dum animo contemplatur, earum potestatem obtinet. Quarum rerum si voluptate implicetur (sajjate), omnem studii fructum amittit. शृणोति शब्दान् श्रोतव्यान्योजनानां शतादपि । सर्वज्ञश्च विधिज्ञश्च योगी चोन्मत्तवद्भवेत् ॥ यक्षराक्षसगंधर्वान्वीक्षते दिव्यमानुषान् । वेत्ति तांश्च महायोगी उपसर्गस्य लक्षणं ॥ देवदानवगंधर्वानृषींश्चापि तथा पितृन् । प्रेक्षते सर्वतश्चैव उन्मत्तं तं विनिर्दिशेत् ॥ भ्रमेण भ्राम्यते योगी चोद्यमानोऽंतरात्मना । भ्रमेण भ्रांतबुद्धेस्तु ज्ञानं सर्वं प्रणश्यति ॥ वार्तो नाशयते चित्तं चोद्यमानें तरात्मना ।[4] वर्तेनाक्रांतबुद्धेस्तु सर्वं ज्ञानं प्रणश्यति ॥ प्रावृत्य मनसा शुक्लं पटं वा कंबलं तथा । ततस्तु परमं ब्रह्म क्षिप्रमेवानुचिंतयेत् ॥ तस्माच्चैवात्मनो दोषांस्तूपसर्गानुपस्थितान् । परित्यजेत मेधावी यदीच्छेत्सिद्धिमात्मन: ॥ ऋषयो देवगंधर्वा यक्षोरगमहासुरा: । उपसर्गेषु संयुक्ता आवर्तंते पुन: पुन: ॥ तस्माद्युक्त: सदा योगी लघ्वाहारो जितेंद्रिय: । तथासुम: सुसूक्ष्मेषु धारणां मूर्ध्नि धारयेत् ॥ ततस्तु योगयुक्तस्य जितनिद्रस्य योगिन: । उपसर्गा: पुनश्चान्ये जायंते प्राणसंज्ञका: ॥ पृथिवीं धारयेत्सर्वां ततश्चापो ह्यनंतरं । ततोऽग्निं चैव सर्वेषामाकाशं मन एव च ॥ तत: परां पुनर्बुद्धिं धारयेत प्रयत्नत: । सिद्धीनां चैव लिंगानि दृष्ट्वा दृष्ट्वा परित्यजेत् ॥ पृथ्वीं धारयमाणस्य मही सूक्ष्मा प्रवर्तते । आत्मानं मन्यते नित्यं पृथ्वीं गंधश्च जायते ॥ अपो धारयमाणस्याप: सूक्ष्मा भवंति हि । शीता रसा: प्रवर्तंते सूक्ष्मा ह्यमृतसन्निभा: ॥ तेजो धारयमाणस्य तेज: सूक्ष्मं प्रवर्तते । आत्मानं मन्यते तेजस्तद्भावमनुपश्यति ॥ वायुं धारयमाणस्य वायु: सूक्ष्म: प्रवर्तते ।

---

[1] प्रक्रिया प्रथम: पाद: कथावस्तुपरिग्रह: । उपोद्घातोऽनुषंगश्च उपसंहार एव च ॥ एवं हि पादश्चत्वार: समासात्कीर्तिता मया । Cap. IV.

[2] मंदो द्वादशमात्रस्तु उद्घाता द्वादश स्मृता: । मध्यमश्च द्विरुद्घातश्चतुर्विंशतिमात्रिका: ॥ उत्तमस्तु त्रिरुद्घातो मात्रा षट्त्रिंशदुच्यते । स्वेदकंपविषादानां जननो ह्युत्तम: स्मृत: ॥

[3] प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा । स्मरणं चैव योगेऽस्मिन्पंच धर्मा: प्रकीर्तिता: ॥

[4] Fortasse वार्तो नाशयते चित्तं चोद्यमानोऽंतरात्मना । वार्तेना° legendum est.

आत्मानं मन्यते वायुं वायुरूपमंडलं भ्रमेत् ॥ आकाशं धारयमाणस्य व्योम सूक्ष्मं प्रवर्तते । पश्यते मंडलं सूक्ष्मं घोषश्चास्य प्रवर्तते ॥ तथा मनो धारयतो मनः सूक्ष्मं प्रवर्तते । मनसा सर्वभूतानां मनस्तु विशते हि सः । बुद्ध्या बुद्धिं यथा युंजेत्तदा विज्ञाय बुध्यते ॥ एतानि सप्त सूक्ष्माणि विदित्वा यस्तु योगवित् । परित्यजति मेधावी स बुद्ध्या परमं व्रजेत् ॥ यस्मिन्यस्मिंश्च संयुक्तो भूत ऐश्वर्यलक्षणे । तत्रैव संगं भजते तेनैव प्रविनश्यति ॥ तस्माद्विदित्वा सूक्ष्माणि संसक्तानि परस्परं । परित्यजति यो बुद्ध्या स परं प्राप्नुयाद्द्विजः ॥ दृश्यंते हि महात्मान ऋषयो दिव्यचक्षुषः । संसक्ताः सूक्ष्मभावेषु ते दोषास्तेषु संश्रिताः ॥ तस्मान्न निश्चयः कार्यः सूक्ष्मेष्विह कदाचन । ऐश्वर्याज्जायते रागो विरागं ब्रह्म चोच्यते ॥ 13. Dominium (aiṣvarya)[1] nactus asceticus octo facultatibus divinis praeditus est: 1. *aṇiman*, subtilitas, qua potestate nemini cernendus omnia intrare potest[2]; 2. *laghiman*, levitas, qua maxima celeritate ubicunque pervenit; 3. *mahiman*, magnitudo; 4. *prápti*, omnia obtinendi facultas; 5. *prákámya*, voluntas libera, qua rebus omnibus frui potest, neque tamen iis detinetur; 6. *íṣitva*, imperium; 7. *vaṣitva*, omnia ipsius voluntati subjiciendi facultas; 8. *yatrakámávasáyitá*, omnia decernendi facultas. 14. Quo animae metempsychosis vitaeque humanae miseriae et vicissitudines[3] evitentur, summo numini cognoscendo opera navanda est. 15. Numen summum in corde commorans octo libamentis colendum est. 16, 17. De Ṣivae cultorum officiis. 18. De erroribus expiandis (práyaṣchitta). 19. De ominibus diris: अत ऊर्ध्वं प्रवक्ष्यामि अरिष्टानि निबोधत । येन ज्ञानविशेषेण मृत्युं पश्यति चात्मनः ॥१॥ अरुंधतीं ध्रुवं चैव सोमच्छायां महापथं । यो न पश्येत्स नो जीवेन्नरः संवत्सरात्परं ॥२॥ अरश्मिवंतमादित्यं रश्मिवंतं च पावकं । यः पश्येन्न वै जीवेत मासादेकादशात्परं ॥३॥ वमेन्मूत्रं पुरीषं वा सुवर्णं रजतं तथा । प्रत्यक्षमथवा स्वप्ने दश मासान्न जीवति ॥४॥ अग्रतः पृष्ठतो वापि खंडं यस्य पदं भवेत् । पांशुले कर्दमे वापि सप्त मासान्स जीवति ॥५॥ काकः कपोतो गृध्रो वा निलीयेद्यस्य मूर्धनि । क्रव्यादो वा खगः कश्चित्षण्मासान्नातिवर्तते ॥६॥ वध्येद्वायसपंक्तीभिः पांसुवर्षेण वा पुनः । छायां वा विकृतां पश्येच्चतुःपंच स जीवति ॥७॥ अनभ्रे विद्युतं पश्येद्दक्षिणां दिशमाश्रितां । उदकेंद्रधनुर्वापि त्रयो द्वौ वा स जीवति ॥८॥ अप्सु वा यदिवादर्शे आत्मानं यो न पश्यति । अशिरस्कं तथात्मानं मासादूर्ध्वं न जीवति ॥९॥ शवगंधि भवेद्गात्रं वसागंधि तथापि वा । मृत्युर्ह्युपस्थितस्तस्य अर्धमासं स जीवति ॥१०॥ यस्य वै स्नातमात्रस्य हृदयं चावशुष्यति । धूमो वा मस्तकात्पश्येद्दशाहं न स जीवति ॥११॥ संभिन्नो मारुतो यस्य मर्मस्थानानि कृंतति । अद्भिः स्पृष्टो न हृष्येच्च तस्य मृत्युरुपस्थितः ॥१२॥ ऋक्षवानरयुक्तेन रथेनाशां तु दक्षिणां । गायन्नथ (गायन्नप्य A. गायन्नस्य B.) व्रजेत्स्वप्ने विद्यान्मृत्युरुपस्थितः ॥१३॥ कृष्णांबरधरा श्यामा गायंती वाथवांगना । यन्नयेद्दक्षिणामाशां स्वप्ने सोऽपि न जीवति ॥१४॥ छिद्रं वासश्च कृष्णं च स्वप्ने यो बिभृयान्नरः । नग्नं वा श्रवणं[4] दृष्ट्वा विद्यान्मृत्युरुपस्थितः ॥१५॥ आ मस्तकतलाद्यस्तु निमज्जेत्पंकसागरे । दृष्ट्वा तु तादृशं स्वप्नं सद्य एव न जीवति ॥१६॥ भस्मांगारांश्च केशांश्च नदीं शुष्कां भुजंगमान् । पश्येद्यो दशरात्रं तु न स जीवेत तादृशः ॥१७॥ कृष्णैश्च विकटैश्चैव पुरुषैरुद्यतायुधैः । पाषाणैस्ताड्यते स्वप्ने यः सद्यो न स जीवति ॥१८॥ सूर्योदये प्रत्युषसि प्रत्यक्षं यस्य वै शिवा । क्रोशंती संमुखाभ्येति स गतायुर्भवेन्नरः ॥१९॥ यस्य वै स्नातमात्रस्य हृदयं पीड्यते भृशं । जायते दंतहर्षश्च तं गतायुषमादिशेत् ॥२०॥ भूयो भूयस्त्रसेद्यस्तु रात्रौ वा यदिवा दिवा । दीपगंधं च नो वेत्ति विद्यान्मृत्युमुपस्थितं ॥२१॥ रात्रौ चेंद्रायुधं पश्येद्दिवा नक्षत्रमंडलं । परनेत्रेषु चात्मानं न पश्येन्न स जीवति ॥२२॥ नेत्रमेकं स्रवेद्यस्य कर्णौ स्थानाच्च भ्रश्यतः । नासा च वक्रा भवति स ज्ञेयो गतजीवितः ॥२३॥ यस्य कृष्णा खरा जिह्वा पद्माभासं च वै मुखं । गंडे चिपिटके (च पिटके B.) रक्ते तस्य मृत्युरुपस्थितः ॥२४॥ मुक्तकेशो हसंश्चैव गायन्नृत्यंश्च यो नरः । याम्याशाभिमुखो गच्छेत्तदंतं तस्य जीवितं ॥२५॥ यस्य स्वेदसमुद्भूताः श्वेतसर्षपसन्निभाः । स्वेदा भवंति ह्यसकृत्तस्य मृत्युरुपस्थितः ॥२६॥ उष्ट्रा वा रासभा वापि युक्ताः स्वप्ने रथे शुभाः । यस्य सोऽपि न जीवेत दक्षिणाभिमुखो गतः ॥२७॥ द्वे चात्र परमेरिष्टे एतद्रूपं (etad rúpam B.) परं भवेत् । घोषं न शृणुयात्कर्णे ज्योतिर्नेत्रेण (l. नेत्रे न) पश्यति ॥२८॥ श्वभ्रे यो निपतेत्स्वप्ने द्वारं चास्य पिधीयते । न चोत्तिष्ठति यः श्वभ्रात्तदंतं तस्य जीवितं ॥२९॥ ऊर्ध्वा च दृष्टिर्न च सप्रतिष्ठा (संप्रतिष्ठा codd.) रक्ता पुनः संपरिवर्तमाना । मुखस्य चोष्मा शुषिरा च नाभिरत्युष्णमूत्रो विषमस्थ एव ॥३०॥ दिवा वा यदिवा रात्रौ प्रत्यक्षं योऽभिहन्यते । तं पश्येदथ हंतारं स हतस्तु न जीवति ॥३१॥ अग्निप्रवेशं कुरुते स्वप्नांते यस्तु मानवः । स्मृतिं नोपलभेच्चापि तदंतं तस्य जीवितं ॥३२॥ यस्तु प्रावरणं शुक्लं स्वकं पश्यति मानवः । रक्तं कृष्णमपि स्वप्ने तस्य मृत्युरुपस्थितः ॥३३॥ अरिष्टसूचिते देहे तस्मिन्काल उपागते । त्यक्त्वा भयं विषादं च उद्गच्छेद्बुद्धिमान्नरः ॥३४॥ etc. 20. De Om syllabae significatione et sanctitate. 21 (fol. $45^b$ = B. $42^a$). Kalparum mensura breviter definitur, deinde viginti octo kalpae enumerantur: Bhava, Bhuvas, Tapas, Bhava, Rambha, Ṛitu, Kratu, Vahni, Havyaváhana, Sávitra,

---

[1] Idque triplex esse dicitur: sávadya, niravadya, súkshma. तत्रापि त्रिविधं ज्ञेयमैश्वर्यं सार्वकामिकं । सावद्यं निरवद्यं च सूक्ष्मं चैव प्रवर्तते ॥ सावद्यं नाम यत्तस्य पंचभूतात्मकं स्मृतं । निरवद्यं तथा नाम पंचभूतात्मकं स्मृतं ॥ इंद्रियाणि मनश्चैव अहंकारश्च वै स्मृतं । तत्र सूक्ष्मं प्रवृत्तं तु (सूक्ष्मप्रवृत्तंस्तु MS.) पंचभूतात्मकं पुनः ॥

[2] त्रैलोक्ये सर्वभूतेषु जीवो ह्यानियतः (sic B. जीवाश्चानियताः A.) स्मृतः । अणिमा च यथाव्यक्तं सर्वं तत्र प्रतिष्ठितं ॥

[3] Quae in hoc capite de hominum origine et vita dicuntur, similiter in Márkaṇḍeyapuráṇa c. 11, Garuḍapuráṇa, Pretakalpa c. 22, et in Vṛihannáradíya c. 30. traduntur.

[4] श्रवमणं A. Hoc loco श्रमण, mendicus Buddhicus, intelligi videtur, quae vox etiam श्रवण scribitur.

Digitized by Google

Bhuvas, Uṣika, Kuṣika, Gandharva, Ṛishabha, Shadja[1], Márjálíya, Madhyama, Vairájaka, Nisháda, Panchama, Meghaváhana, Chintaka, Ákúti, Vijnáti, Manas, Bháva, Vṛihat. Kalpas, qui a Gandharva vocabulo incipiant et in Meghaváhana voce desinant, a modulis musicis denominatos esse, facile apparet. 22, 23. Ṣiva quatuor aevis (kalpa) se manifestavit, forma alba, rubra, nigra, omnigena (Viṣvarúpa). Aetate flava Maheṣvarí orta est. Ṣiva coram Brahmane de futuris kalpis, suis ipsius in singulis manifestationibus, sectae Ṣivaiticae conditoribus disserit: ततस्तस्मिंस्तदा कल्पे वाराहे सप्तमे प्रभोः। पुनर्विष्णुर्महातेजाः कालो लोकप्रकालनः। मनुर्वैवस्वतो नाम तव पुत्रो भविष्यति॥ तदा चतुर्युगावस्थे कल्पे तस्मिन्युगांतके। भविष्यामि शिखायुक्तः श्वेतो नाम महामुनिः॥ हिमवच्छिखरे रम्ये छागले पर्वतोत्तमे। चतुःशिष्याः शिवे युक्ता भविष्यंति तदा मम॥ श्वेतः श्वेतशिखश्चैव श्वेतास्यः श्वेतलोहितः। चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः॥ ततस्ते ब्रह्मभूयिष्ठा दृष्ट्वा ब्रह्मगतिं परां। तत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं॥ पुनस्तु मम देवेश द्वितीये द्वापरे प्रभुः। प्रजापतिर्यदा व्यासः सत्यो नाम भविष्यति॥ तदा लोकहितार्थाय सुतारो नाम नामतः। भविष्यामि कलौ तस्मिन् लोकानुग्रहकारणात्॥ तत्रापि मम ते पुत्रा भविष्या नाम नामतः। दुंदुभिः शतरूपश्च ऋचीकः केतुमांस्तथा॥ प्राप्य योगं तथा ज्ञानं ब्रह्म चैव सनातनं। रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं॥ तृतीये द्वापरे चैव यदा व्यासस्तु भार्गवः। तदा त्वहं भविष्यामि दमनस्तु युगांतके॥ तत्रापि च भविष्यंति चत्वारो मम पुत्रकाः। विशोकश्च विकेशश्च विशापः शापनाशनः॥ तेऽपि तेनैव मार्गेण योगोक्तेन महौजसः। रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं॥ चतुर्थे द्वापरे चैव यदा व्यासोऽंगिराः स्मृतः। तदाप्यहं भविष्यामि सुहोत्रो नाम नामतः॥ तत्रापि मम सत्पुत्राश्चत्वारश्च तपोधनाः। भविष्यंति द्विजश्रेष्ठा योगात्मानो दृढव्रताः॥ सुमुखो दुर्मुखश्चैव दुर्दमो दुरतिक्रमः। प्राप्य योगगतिं सूक्ष्मां विमला दग्धकिल्बिषाः॥ तेऽपि तेनैव मार्गेण गमिष्यंति न संशयः। पंचमे द्वापरे चैव व्यासस्तु सविता यदा॥ तदा चापि भविष्यामि कंको नाम महातपाः। अनुग्रहार्थं लोकानां योगात्मानेककर्मकृत्॥ चत्वारस्तु महाभागा विरजाः शुद्धयोनयः। पुत्रा मम भविष्यंति योगात्मानो दृढव्रताः॥ सनः सनंदनश्चैव प्रभुर्यस्य सनातनः। क्रतुः सनत्कुमारश्च निर्ममा निरहंकृताः॥ मत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं। परिवर्ते पुनः षष्ठे मृत्युर्व्यासो यदा विभुः॥ तदाप्यहं भविष्यामि लोकाक्षिर्नाम नामतः। शिष्याश्च मम ते दिव्या योगात्मानो दृढव्रताः॥ भविष्यंति महाभागाश्चत्वारो लोकसंमताः। सुधामा विरजाश्चैव शंख आद्रव (?) एव च॥ योगात्मानो महात्मानस्ते सर्वे दग्धकिल्बिषाः। तेऽपि तेनैव मार्गेण गमिष्यंति न संशयः॥ सप्तमे परिवर्ते तु यदा व्यासः शतक्रतुः। विभुर्नाम महातेजाः पूर्वमासीच्छतक्रतुः॥ तदाप्यहं भविष्यामि कलौ तस्मिन्युगांतके। जैगीषव्येति विख्यातः सर्वेषां योगिनां वरः॥ तत्रापि मम ते पुत्रा भविष्यंति युगे तदा। सारस्वतः सुमेधाश्च वसुवाहः सुवाहनः॥ तेऽपि तेनैव मार्गेण ध्यानयुक्तिं समाश्रिताः। भविष्यंति महात्मानो रुद्रलोकपरायणाः॥ वसिष्ठश्चाष्टमे व्यासः परिवर्ते भविष्यति। कपिलश्चासुरिश्चैव तथा पंचशिखो मुनिः॥ वाग्वलिश्च महायोगी सर्वे एव महौजसः॥ प्राप्य माहेश्वरं योगं ध्यानिनो दग्धकल्मषाः। मत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं॥ परिवर्तेऽथ नवमे व्यासः सारस्वतो यदा। तदा चाहं भविष्यामि ऋषभो नाम नामतः॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः। पराशरश्च गार्ग्यश्च भार्गवो ह्यंगिरास्तथा॥ भविष्यंति महात्मानो ब्राह्मणा वेदपारगाः। सर्वे तपोबलोत्कृष्टाः शापानुग्रहकोविदाः॥ तेऽपि तेनैव मार्गेण योगोक्तेन तपस्विनः। ध्यानमार्गं समासाद्य गमिष्यंति तथैव च॥ दशमे द्वापरे व्यासस्त्रिधामा नाम नामतः। यदा भविष्यति विप्र[र्षि]स्तदाहं भविता पुनः॥ हिमवच्छिखरे रम्ये भृगुतुंगे नगोत्तमे। नाम्ना भृगोस्तु शिखरं तस्मात्तच्छिखरं भृगुः॥ तत्रैव मम ते पुत्रा भविष्यति दृढव्रताः। बलबंधुर्निरामित्रः (बलबंधर्निरा° A. बलबंधनिरा° B.) केतुशृंगस्तपोधनः॥ योगात्मानो महात्मानो ध्यानयोगसमन्विताः। रुद्रलोकं गमिष्यंति तपसा दग्धकल्मषाः॥ एकादशे द्वापरे तु भृवृद्व्यासो (विवृ° B. Fortasse *Bhṛigur.*) भविष्यति। तदाप्यहं भविष्यामि गंगाद्वारे कलेर्धुरि॥ उग्रा नाम महानादास्तत्रैव मम पुत्रकाः। भविष्यंति महौजस्काः सुवृत्ता लोकविश्रुताः॥ लंबोदरश्च लंबश्च लंबाक्षो लंबकेशकः। प्राप्य माहेश्वरं योगं रुद्रलोकाय संस्थिताः। तेऽपि तेनैव मार्गेण गमिष्यंति परां गतिं॥ द्वादशे परिवर्ते तु शततेजा महामुनिः। भविष्यति महासत्त्वो व्यासः कविवरोत्तमः॥ ततोऽप्यहं भविष्यामि अत्रिर्नाम युगांतके। हेमकं वनमासाद्य (हेमकंचन° B.) योगमास्थाय भूतले॥ अत्रापि मम ते पुत्रा भस्मस्नानानुलेपनाः। भविष्यंति महायोगा रुद्रलोकपरायणाः॥ सर्वज्ञः समबुद्धिश्च साध्यः सर्वस्तथैव च। रुद्रलोकं गमिष्यंति ध्यानयोगपरायणाः॥ त्रयोदशे पुनः प्राप्ते परिवर्ते क्रमेण तु। धर्मो नारायणो नाम व्यासस्तु भविता यदा॥ तदाप्यहं भविष्यामि वालिर्नाम महामुनिः। वालिखिल्याश्रमे पुण्ये पर्वते गंधमादने॥ तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः। सुधामा काश्यपश्चैव वसिष्ठो विरजास्तथा॥ महायोगबलोपेता विमला ऊर्ध्वरेतसः। तेनैव योगमार्गेण गमिष्यंति न संशयः॥ यदा व्यासः सुरक्षस्तु पर्यायश्च चतुर्दशः। तत्रापि पुनरेवाहं भविष्यामि युगांतके॥ वंशे त्वंगिरसः श्रेष्ठो गौतमो नाम योगवित्। तस्माद्भविष्यते पुण्यं गौतमं नाम तद्वनं॥ तत्रापि मम ते पुत्रा भविष्यंति कलौ तथा। अत्रिरुग्रतपाश्चैव श्रावणो श्रविष्टकः (सावणोप्यसतिष्वकाः B. Fortasse श्रावणोऽथ श्रविष्टकः:) ॥ योगात्मानो महात्मानो ध्यानयोगपरायणाः। तेऽपि तेनैव मार्गेण रुद्रलोकनिवासिनः॥ ततः प्राप्ते पंचदशे परिवर्ते क्रमागते। त्र्यारुणिस्तु यदा व्यासो द्वापरे भविता प्रभुः॥ तदाप्यहं भविष्यामि नाम्ना वेदशिरा द्विजः। तत्र वेदशिरो नाम अस्त्रं तत्पारमेश्वरं॥ भविष्यति महावीर्यं वेदशीर्षश्च पर्वतः। हिमवत्पृष्ठमाश्रित्य सरस्वत्या नगोत्तमे॥ तदापि मम ते पुत्रा भविष्यंति तपोधनाः। कुणिश्च कुणिबाहुश्च कुशरीरः कुनेत्रकः॥ योगात्मानो महात्मानो ब्रह्मिष्ठाश्चोर्ध्वरेतसः। तेऽपि तेनैव मार्गेण रुद्रलोकं गतास्तु वै॥ ततः षोडशमे चापि परिवर्ते क्रमागते। व्यासस्तु संजयो नाम भविष्यति यदा (तदा MSS.) प्रभुः॥ तदाप्यहं भविष्यामि गोकर्णो नाम

[1] षड्जना यत्र चर्षयः।

नामतः । तस्माद्भविष्यते पुण्यं गोकर्णं नाम तद्वनं ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः । काश्यपो ह्युशनाश्चैव च्यवनोऽथ बृहस्पतिः ॥ तेऽपि तेनैव मार्गेण गमिष्यंति परं पदं । ततः सप्तदशे चैव परिवर्तें क्रमागते ॥ तदा भविष्यते व्यासो नाम्ना देवः कृतंजयः । तदाप्यहं भविष्यामि गुहवासीति (l. गुहावासीति) नामतः ॥ हिमवच्छिखरे चैव महातुंगे महालये । सिद्धक्षेत्रं महापुण्यं भविष्यति महालयं ॥ तत्रापि मम ते पुत्रा ब्रह्मज्ञा योगवादिनः । भविष्यंति महात्मानो निर्ममा निरहंकृताः ॥ उतथ्यो वामदेवश्च महाकालो महालयः । तेषां शतसहस्रं तु शिष्याणां ध्यानसाधनं ॥ भविष्यंति तदा कल्पे सर्वे ते ध्यानयुंजकाः । ते तु संनिहिता योगे हृदि (तुङ्गदि A.[1]) कृत्वा महेश्वरं । महालये पदं क्षिप्त्वा प्रविष्टाः शिवमव्ययं ॥ ये चान्येऽपि महात्मानः काले तस्मिन्युगांतके । ध्यानयुक्तेन मनसा विमलाः शुद्धबुद्धयः ॥ गत्वा महालयं पुण्यं दृष्ट्वा माहेश्वरं पदं । तूर्णं तारयते जंतुर्दश (जंतु A.) पूर्वान्दशावरान् ॥ आत्मानमेकविंशं च तारयित्वा महालये । मम प्रसादाद्यास्यंति रुद्रलोकं गतज्वराः ॥ ततोऽष्टादशमश्चैव परिवर्तो यदा भवेत् । तदा ऋतंजयो नाम व्यासस्तु भविता मुनिः ॥ तदाप्यहं भविष्यामि शिखंडी नाम नामतः । सिद्धक्षेत्रे महापुण्ये देवदानवपूजिते ॥ हिमवच्छिखरे पुण्ये शिखंडी यत्र पर्वतः । शिखंडिनो वनं चापि ऋषिसिद्धनिषेवितं ॥ तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः । वाचश्रवा ऋचीकश्च श्यावाश्वश्च दृढव्रतः (शावाश्वस्य दृव्रतः A.) ॥ योगात्मानो महासत्त्वाः सर्वे ते वेदपारगाः । प्राप्य माहेश्वरं योगं रुद्रलोकं व्रजंति ते ॥ ततस्त्वेकोनविंशे तु परिवर्तें क्रमागते । व्यासस्तु भविता नाम्ना भारद्वाजो (भरद्वा°?) महामुनिः ॥ तत्राप्यहं भविष्यामि जटामालीति नामतः । हिमवच्छिखरे रम्ये जटायुर्यत्र पर्वतः ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः । हिरण्यनामा कौशल्यः काक्षीवः (कौशिल्यः काक्षिवः A.) कुथुमिस्तथा ॥ ईश्वरयोगधर्माणः सर्वे ते ह्यूर्ध्वरेतसः । प्राप्य माहेश्वरं योगं गमिष्यंति [न संशयः ॥ ततो विंशतिमे सर्गे परिवर्तें क्रमेण तु । वाचश्रवाः स्मृतो व्यासो भविष्यति] महामतिः ॥ तदाप्यहं भविष्यामि ह्यट्टहासेति नामतः । अट्टहासप्रियाश्चापि भविष्यंति तदा नराः ॥ तत्रैव हिमवत्पृष्ठे त्वट्टहासो [महागिरिः । भविष्यति] महातेजाः सिद्धचारणसेवितः ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः । युक्तात्मानो महासत्त्वा ध्यानिनो नियतव्रताः ॥ सुमंतुर्बर्बरिर्विद्वान्सुबंधुः कुशिकंधरः । प्राप्य माहेश्वरं योगं रुद्रलोकाय ते गताः ॥ एकविंशे पुनः प्राप्ते परिवर्तें क्रमेण तु । वाचस्पतिः स्मृतो व्यासो यदा स ऋषिसत्तमः ॥ तदाप्यहं भविष्यामि दारुको नाम नामतः । तस्माद्भविष्यते पुण्यं देवदारुवनं महत् ॥ तत्रापि मम ते पुत्रा भविष्यंति महौजसः । प्लक्षो दाल्मायणिश्चैव केतुमाली नकस्तथा ॥ योगात्मानो महात्मानो नियता ह्यूर्ध्वरेतसः । परमं योगमास्थाय रुद्रं प्राप्तास्तथानघाः ॥ द्वाविंशे परिवर्तें तु व्यासः शुक्लायनो यदा । तदाप्यहं भविष्यामि वाराणस्यां महामुनिः ॥ नाम्ना वै लांगली भीमो यत्र देवाः सवासवाः । द्रक्ष्यंति मां कलौ तस्मिन्नवतीर्णं हलायुधं ॥ तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः । भल्लाविर्मधुपिंगाक्षः श्वेतकेतुस्तथैव च (स्वेतकानु° A. In cod. B. totus versus deest.) ॥ तेऽपि माहेश्वरं योगं प्राप्य ध्यानपरायणाः । विरजा ब्रह्मभूयिष्ठा रुद्रलोकाय संस्थिताः ॥ परिवर्तें त्रयोविंशे तृणबिंदुर्यदा मुनिः । व्यासो भविष्यति ब्रह्मा तदाहं भविता पुनः ॥ श्वेतो नाम महाकायो मुनिपुत्रः सुधार्मिकः । तत्र कालं जरिष्यामि तदा गिरिवरोत्तमे ॥ तेन कालंजरो नाम भविष्यति स पर्वतः । तत्रापि मम ते पुत्रा भविष्यंति महौजसः ॥ औशिजो बृहदुक्थश्च देवलः कविरेव च । प्राप्य माहेश्वरं योगं रुद्रलोकं गता हि ते ॥ परिवर्तें चतुर्विंशे ऋक्षो व्यासो भविष्यति । तत्राहं भविता ब्रह्मन् कलौ तस्मिन्युगांतके ॥ शूली नाम महायोगी नैमिषे योगिवंदिते । तत्रापि मम ते पुत्रा भविष्यंति तपस्विनः ॥ शालिहोत्रोऽग्निवेशश्च (ग्निवेश्यश्च A. B.) युवनाश्वः शरद्वसुः । तेऽपि योगबलोपेता रुद्रं यास्यंति सुव्रताः ॥ पंचविंशे पुनः प्राप्ते परिवर्तें यथाक्रमं । वासिष्ठस्तु यदा व्यासः शक्तिर्नाम भविष्यति ॥ तदाप्यहं भविष्यामि दंडिमुंडीश्वरः प्रभुः । कोटिवर्षं समासाद्य नगरं देवपूजितं ॥ तत्रापि मम ते पुत्रा भविष्यंति क्रमागताः । योगात्मानो महात्मानः सर्वे ते ह्यूर्ध्वरेतसः ॥ छगलः कुंभकर्णश्च कुंभश्चैव प्रवाहुकः । प्राप्य माहेश्वरं योगं गमिष्यंति तथैव ते ॥ षड्विंशे परिवर्तें तु यदा व्यासः पराशरः । तदाप्यहं भविष्यामि सहिष्णुर्नाम नामतः ॥ पुण्यं रुद्रवटं प्राप्य कलौ तस्मिन्युगांतके । तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः ॥ उलूको वैद्युतश्चैव शर्वको ह्याश्वलायनः । प्राप्य माहेश्वरं योगं गंतारस्ते तथैव हि ॥ सप्तविंशतिमे प्राप्ते परिवर्तें क्रमागते । जातूकर्ण्यो यदा व्यासो भविष्यति तपोधनः ॥ तदाप्यहं भविष्यामि सोमशर्मा द्विजोत्तमः । प्रभासतीर्थमासाद्य योगात्मा लोकविश्रुतः ॥ तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः । अक्षपादः कणादश्च उलूको वत्स एव च ॥ योगात्मानो महात्मानो विमलाः शुद्धबुद्धयः । प्राप्य माहेश्वरं योगं रुद्रलोकं ततो गताः ॥ अष्टाविंशे पुनः प्राप्ते परिवर्तें क्रमागते । पराशरसुतः श्रीमान्विष्णुर्लोकपितामहः ॥ यदा भविष्यति व्यासो नाम्ना द्वैपायनः प्रभुः । तदा षष्ठेन चांशेन कृष्णः पुरुषसत्तमः ॥ वसुदेवाद्यदुश्रेष्ठो वासुदेवो भविष्यति । तदा चाहं भविष्यामि योगात्मा योगमायया ॥ लोकविस्मयनार्थाय ब्रह्मचारी – – –ः । श्मशाने मृतमुत्सृष्टं दृष्ट्वा लोकमनाथकं ॥ ब्राह्मणानां हितार्थाय प्रविष्टो योगमायया । दिव्यां मेरुगुहां पुण्यां त्वया सार्धं च विष्णुना ॥ भविष्यामि तदा ब्रह्मन् लकुली नाम नामतः । कायारोहणमित्येवं सिद्धक्षेत्रं च वै तदा ॥ भविष्यति तु विख्यातं यावद्भूमिर्धरिष्यति । तत्रापि मम ते पुत्रा भविष्यंति तपस्विनः ॥ कुशिकश्चैव गार्ग्यश्च मित्रको रुष्ट एव च । योगयुक्ता महात्मानो ब्राह्मणा वेदपारगाः ॥ प्राप्य माहेश्वरं योगं विमला ह्यूर्ध्वरेतसः । रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं ॥ इत्येतद्वै मया प्रोक्तमवतारेषु लक्षणं । मन्वादिकृष्णपर्यंतमष्टाविंशं युगक्रमात् ॥ तत्र श्रुतिसमूहानां विभागो धर्मलक्षणं । भविष्यति तदा कल्पे कृष्णद्वैपायनो यदा ॥

24. De Brahmanis et Ṣivae origine. 25. De creatione. 26. De syllaba Om, e cujus elementis tres Vedae orti sunt. Quatuordecim vocalibus totidem Manues repraesentantur. 27. Octo Ṣivae nomina, locique in quibus singula colenda sunt: Rudra (सूर्यो मही जलं वह्निर्वायुराकाश एव च । दीक्षितो ब्राह्मणश्चंद्र इत्येते ब्रह्मधातवः ॥ तेषु पूज्यश्च वंद्यः स्याद्रुद्रस्तान्न हिनस्ति वै), Bhava = aqua, Ṣarva = terra,

[1] In cod. B. omnia inde a षोडशमे चापि परिवर्तें [क्रमा° usque ad महासत्त्वा] ध्यानिनो desiderantur.



Digitized by Google

Íṣána = ventus, Paṣupati = ignis, Bhíma, Ugra, Mahádeva. 28. De septem vatum divinorum prole. 29. De Agnis prole. Hoc caput a quinquagesimo Matsyapuráṇae capite non differt. 31 (fol. 72ᵇ = B. 66ᵇ). De manium generibus. Daksha Ṣivae imprecatione Práchínabarhishis filius, Prachetasis nepos nascitur. Dakshae sacrificium a Ṣiva dirimitur. Haec narratio iisdem verbis in Brahmapuráṇa (cod. 62, fol. 65ᵃ) traditur. 31. De temporis divisione. 32. De quatuor mundi aetatibus. 33. De Manuis Sváyambhuvae prole, et de septem insularum terrestrium regibus. 34–53. Mundi descriptio. Magna pars in Matsyapuráṇa (capp. 102–115) iisdem verbis legitur. 54 (fol. 144ᵃ = B. 125ᵇ). De Nílakaṇṭhae, Ṣivae epitheti, origine. 55. Ṣivae praestantia celebratur origine lingae, cujus magnitudinem neque Brahman neque Vishṇus emetiri potuerunt[1]. 56–58. Haec capita a Matsyapuráṇa (capp. 128–130) non differunt.

Codex, omnium quos equidem vidi sincerissimus, medio seculo quinto decimo videtur exaratus esse. Fol. 79. desideratur. Multa folia tam lacera sunt, ut librum, qui collaturi sunt, viri docti, ut summa cautione tractent, monendi sint. (Wilson 355.)

---

## 104.

Lit. Devan. Charta Ind. Foll. 270. Long. 14. Lat. 7. Linn. 13.

*Váyupuráṇae* pars utraque.

C. 59 (fol. 143ᵃ). Hoc caput a Matsyapuráṇae c. 132. non differt. 60. De Vedarum divisione[2]: द्वापरे तु पुरावृत्ते मनोः स्वायंभुवेऽंतरे । ब्रह्मा मनुमुवाचेदं वेदं व्यस्य महामते ॥ परिवृत्तं युगं तात स्वल्पवीर्या द्विजातयः । संवृत्ता युगदोषेण सर्वं चैव यथाक्रमं ॥ भ्रश्यमानं युगवशादल्पशिष्टं हि दृश्यते । दशसाहस्रभागेन ह्यवशिष्टं कृतादिदं ॥ वीर्यं तेजो बलं चाल्पं सर्वं चैव प्रणश्यति । वेदे वेदा हि कार्याः स्युर्मा भूद्वेदविनाशनं ॥ वेदे नाशमनुप्राप्ते यज्ञो नाशं गमिष्यति । यज्ञे नष्टे देवनाशस्ततः सर्वं प्रणश्यति ॥ आद्यो वेदश्चतुष्पादः शतसाहस्रसंमितः । पुनर्दशगुणः कृत्स्नो यज्ञो वै सर्वकामधुक् ॥ एवमुक्तस्तथेत्युक्त्वा मनुर्लोकहिते रतः । वेदमेकं चतुष्पादं चतुर्धा व्यभजत्प्रभुः ॥ ब्रह्मणो वचनात्तात लोकानां हितकाम्यया । तदहं वर्तमानेन युष्माकं वेदकल्पनं ॥ [मन्वंतरेण वक्ष्यामि व्यतीतानां प्रकल्पनं ।][3] प्रत्यक्षेण परोक्षं वै तन्निबोधत सत्तमाः ॥ अस्मिन्युगे कृतो व्यासः पाराशर्यः परंतपः । द्वैपायन इति ख्यातो विष्णोरंशः प्रकीर्तितः ॥ ब्रह्मणा चोदितः सोऽस्मिन्वेदं व्यस्तुं प्रचक्रमे । अथ शिष्यान्स जग्राह चतुरो वेदकारणात् ॥ जैमिनिं च सुमंतुं च वैशंपायनमेव च । पैलं तेषां चतुर्थं तु पंचमं लोमहर्षणं ॥ ऋग्वेदश्रावकं पैलं जग्राह विधिवद्द्विजं । यजुर्वेदप्रवक्तारं वैशंपायनमेव च ॥ जैमिनिं सामवेदार्थश्रावकं सोऽन्वपद्यत । तथैवाथर्ववेदस्य सुमंतुमृषिसत्तमं ॥ इतिहासपुराणस्य वाक्योवाक्यस्य चैव हि । मां चैव प्रतिजग्राह भगवानीश्वरः प्रभुः ॥ एक आसीद्यजुर्वेदस्तं चतुर्धा व्यकल्पयत् । चातुर्होत्रमभूत्तस्मिंस्तेन यज्ञमकल्पयत् ॥ आध्वर्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथैव च । औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः । ब्रह्मत्वमकरोद्यज्ञे वेदेनाथर्वणेन तु ॥[4] ततः स ऋच उद्धृत्य ऋग्वेदं समकल्पयत् । हौतृकं (होतृत्वं C.) कल्पयत्तेन यज्ञवाहं जगद्धितं ॥ सामभिः सामवेदं च तेनौद्गात्रमरोचयत् । राज्ञस्त्वथर्ववेदेन सर्वकर्माण्यकारयत् ॥ आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कुलकुंकुभिः (कुल्य° C.) । पुराणसंहितां चक्रे पुराणार्थविशारदः ॥ यच्छिष्टं तु यजुर्वेदे तेन यज्ञमथायुजत् । युंजानः स यजुर्वेद इति शास्त्रविनिश्चयः ॥ पादानामुद्धृतत्वाच्च यजूंषि विषमाणि च । स तेनोद्धृतवीर्यस्तु ऋत्विग्भिर्वेदपारगैः । प्रयुज्यते ह्यश्वमेधस्तेन (°धतेन C. asvamedhe?) वा युज्यते तु सः ॥ ऋचो गृहीत्वा पैलस्तु व्यभजत्तद्द्विधा पुनः । द्विः कृत्वा संयुगे चैव शिष्याभ्यामददात्प्रभुः ॥ इंद्रप्रमतये चैकां द्वितीयां बाष्कलाय च । चतस्रः संहिताः कृत्वा बाष्कलिर्द्विजसत्तमः ॥ शिष्यानध्यापयामास शुश्रूषाभिरतान्हितान् । बोध्यं तु प्रथमां शाखां द्वितीयामग्निमाठरं । पाराशरं तृतीयां तु याज्ञवल्क्यमथापरां ॥ इंद्रप्रमतिरेकां तु संहितां द्विजसत्तमः । अध्यापयन्महाभागं मार्कंडेयं यशस्विनं ॥ सत्यश्रवसमग्र्यं तु पुत्रं स तु महायशाः । सत्यश्रवाः सत्यहितं पुनरध्यापयद्द्विजं ॥ सोऽपि सत्पितरं (sic C. सच्छितरं B. सच्छितरं D.) पुत्रं पुनरध्यापयद्विभुः । सत्यश्रियं महात्मानं सत्यधर्मपरायणं ॥ अभवंस्तस्य शिष्या वै त्रयस्तु सुमहौजसः । सत्यश्रियस्तु विद्वांसः शास्त्रग्रहणतत्पराः ॥ शाकल्यः प्रथमस्तेषां तस्मादन्यो रथीतरः । बाष्कलिश्च भरद्वाज इति शाखाप्रवर्तकाः ॥ देवमित्रस्तु शाकल्यो ज्ञानाहंकारगर्वितः । जनकस्य स यज्ञे वै विनाशमगमद्द्विजाः ॥ Sequitur narratio de Devamitra Ṣákalya, qui a Yájnavalkya doctrinae certamine victus moritur. देवमित्रस्तु शाकल्यो महात्मा द्विजसत्तमः । चकार संहिताः पंच बुद्धिमान्पदवित्तमः ॥ तस्य शिष्या भवन्पंच मुद्गलो गोलकस्तथा । खालीयश्च (खालोपश्च B. खालोयश्च D.) तथा मत्स्यः शैशिरेयश्च पंचमः ॥[5] प्रोवाच संहितास्तिस्रः शाकपूणी रथीतरः (शाकपूणिरथीतरः C. शाकपूर्णरथंतरः B.) । निरुक्तं च पुनश्चक्रे चतुर्थं द्विजसत्तमाः ॥ तस्य शिष्यास्तु चत्वारः केनवो वामनस्तथा । धर्मशर्मा देवशर्मा सर्वे व्रतधरा द्विजाः ॥ शाकल्ये च मृते सद्यो ब्रह्मघ्नास्ते बभूवतुः । ततश्चिंतां परां प्राप्य गतास्ते ब्रह्मणोऽंतिकं etc. 61. भारद्वाजो याज्ञवल्क्यो गालविः सालकिस्तथा । धीमान् शतबलाकश्च

---

[1] Occurrit ibi hoc Ṣivae dictum: अयं मे दक्षिणो बाहुर्ब्रह्मा लोकपितामहः । वामो बाहुश्च मे विष्णुर्नित्यं युद्धेषु निर्जितः ॥

[2] Cf. Vishṇupuráṇa III, 4.

[3] In hac parte codicibus E. I. H. 2102, 2103 (= C.) et 1310 (= D.) usus sum. Versus uncis inclusus in codd. B. D. desideratur.

[4] Hic versus subditivus est.

[5] मुद्गलो गोमुखश्चैव वात्स्यः शालीय एव च । शिशिरः पंचमश्चासीन्मैत्रेयस्तु महामुनिः ॥ Vishṇupuráṇa III, 4, 20. Pro Gomukha codices deterrimi गोखलु legunt.

नैगमश्च द्विजोत्तमाः ॥ बाष्कलिश्च भरद्वाजस्तिस्रः प्रोवाच संहिताः । रथीतरो निरुक्तं च पुनश्चक्रे चतुर्थकं ॥ त्रयस्तस्याभवन् शिष्या महात्मानो गुणान्विताः । धीमान्नंदायनीयश्च पन्नगानिश्च (पन्नगारिश्च B. D.) बुद्धिमान् ॥ तृतीयश्चार्जवस्ते च तपसा शंसितव्रताः । वीतरागा महातेजाः संहिताज्ञानपारगाः ॥ इत्येते बह्वृचां प्रोक्ता संहिता यैः प्रवर्तिताः । वैशंपायनगोत्रोऽसौ यजुर्वेदं व्यकल्पयत् ॥ षडशीतिस्तु येनोक्ता संहिता यजुषां शुभाः । शिष्येभ्यः प्रददौ ताश्च जगृहुस्ते विधानतः ॥ एकस्तत्र परित्यक्तो याज्ञवल्क्यो महातपाः । षडशीतिश्च तस्यापि संहितानां विकल्पकाः ॥ सर्वेषामेव तेषां वै त्रिधा भेदाः प्रकीर्तिताः । त्रिधा भेदास्तु ते प्रोक्ता भेदेऽस्मिन्नवमे शुभे ॥ उदीच्या मध्यदेशाश्च प्राच्याश्चैव पृथग्विधाः । श्यामायनिरुदीच्यानां प्रधानः संबभूव ह ॥ मध्यदेशप्रतिष्ठानामारुणिः प्रथमः स्मृतः । आलंबिरादिः प्राच्यानां त्रयोदश्यादयस्तु ते । इत्येते चरका प्रोक्ता संहितावादिनो द्विजाः ॥ ऋषयस्तत्र च श्रुत्वा सूतं जिज्ञासवोऽब्रुवन् । चरकाध्वर्यवः केन कारणं ब्रूहि तत्त्वतः ॥ किं चीर्णं कस्य हेतोश्च चरकत्वं च भेजिरे । इत्युक्तः प्राह तेषां स चरकत्वमभूद्यथा ॥ सूत उवाच ॥ कार्यमासीदृषीणां च किंचिद्ब्राह्मणसत्तमाः । मेरुपृष्ठं समासाद्य तैस्तदास्त्विति मंत्रितं ॥ यो नोऽत्र सप्तरात्रेण नागच्छेद्द्विजसत्तमाः । स कुर्याद्ब्रह्मवध्यां वै समयो नः प्रकीर्तितः ॥ ततस्ते सगणाः सर्वे वैशंपायनवर्जिताः । प्रययुः सप्तरात्रेण यत्र संधिः कृतोऽभवत् ॥ ब्राह्मणानां तु वचनाद्ब्रह्मवध्यां चकार सः । शिष्यानथ समानीय स वैशंपायनोऽब्रवीत् ॥ ब्रह्मवध्यां चरध्वं वै मत्कृते द्विजसत्तमाः । सर्वे यूयं समागम्य ब्रूत मे तद्धितं वचः ॥ याज्ञवल्क्य उवाच ॥ अहमेव चरिष्यामि तिष्ठंतु मुनयस्त्विमे । बलं चोत्थापयिष्यामि तपसा स्वेन भावितः ॥ एवमुक्तस्ततः क्रुद्धो याज्ञवल्क्यमथाब्रवीत् । उवाच यत्त्वयाधीतं सर्वं प्रत्यर्पयस्व मे ॥ एवमुक्तः सरूपाणि यजूंषि प्रददौ गुरोः । रुधिरेण तथाक्तानि छर्दित्वा ब्रह्मवित्तमः ॥ ततः स ध्यानमास्थाय सूर्यमाराधयद्द्विजः । सूर्य ब्रह्म यदुच्छिन्नं खं गत्वा प्रतितिष्ठति ॥ ततो यानि गतान्यूर्ध्वं यजूंष्यादित्यमंडलं । तानि तस्मै ददौ तुष्टः सूर्यो वै ब्रह्मरातये ॥ अश्वरूपश्च मार्तंडो याज्ञवल्क्याय धीमते । यजूंष्यधीयते यानि ब्रह्मणा (ब्राह्मणो B. D.) येन केनचित् ॥ अश्वरूपाणि दत्तानि ततस्ते वाजिनोऽभवन् । ब्रह्महत्या तु यैश्चीर्णा चरणाच्चरकाः स्मृताः ॥ वैशंपायनशिष्यास्ते चरकाः समुदाहृताः । इत्येते चरकाः प्रोक्ता वाजिनस्तु निबोधत ॥ याज्ञवल्क्यस्य शिष्यास्ते कण्ववैधेयशालिनः । मध्यंदिनश्च शापेयी विदग्धश्चाथ उद्दलः ॥ ताम्रायणश्च वात्स्यश्च तथा गालवशैषिरी (गोलवशैषिरी C. गालवशौषिरी B. गालवशैषिरी D.) । आटवी (आटवी C. अटव्या B. अटवी D.) च तथा पर्णी वीरणी सपरायणः ॥ इत्येते वाजिनः प्रोक्ता दश पंच च संमताः । शतमेकाधिकं कृत्स्नं यजुषां ये विकल्पकाः ॥ पुत्रमध्यापयामास सुमंतुमथ जैमिनिः । सुमंतुश्चापि सुन्वानं पुत्रमध्यापयत्प्रभुः ॥ स सहस्रमधीत्याशु सुकर्माप्यथ संहिताः । प्रोवाचाथ सहस्रस्य सुकर्मा सूर्यवर्चसः ॥ अनध्यायेष्वधीयानान् तान् जघान शतक्रतुः । प्रायोपवेशमकरोत्ततोऽसौ शिष्यकारणात् ॥ क्रुद्धं दृष्ट्वा ततः शक्रो वरमस्मै ददौ पुनः । भाविनौ ते महावीर्यौ शिष्यावनलवर्चसौ ॥ अधीयानौ महाप्राज्ञौ सहस्रसंहिता उभौ । एते सुरा महाभाग मा क्रुध्य द्विजसत्तम ॥ इत्युक्त्वा वासवः श्रीमान् सुकर्माणं यशस्विनं । शांतक्रोधं द्विजं दृष्ट्वा तत्रैवांतरधीयत ॥ तस्य शिष्योऽभवद्धीमान्पौष्पिंजिर्द्विजसत्तमाः । हिरण्यनाभः कौशिल्यो द्वितीयोऽभून्नराधिपः ॥ अध्यापयत्तु पौष्पिंजिः सहस्रार्धं तु संहिताः । ते नाम्नोदीच्यसामान्याः शिष्याः पौष्पिंजिनः शुभाः ॥ शतानि पंच कौशिल्यः संहितानां च वीर्यवान् । शिष्या हिरण्यनाभस्य स्मृतास्ते प्राच्यसामगाः ॥ लोकाक्षिः कुथुमिश्चैव कुशीतिर्लांगलिस्तथा । पौष्पिंजिशिष्याश्चत्वारस्तेषां भेदान्निबोधत ॥ राणायनीयः (रायाणनीयः C.) सहतंडिपुत्रस्तस्मादन्यो मूलचारी सुविद्वान् । सकैतिपुत्रः सहसात्यपुत्र एतान्भेदान्विद्धि लोकाक्षिणस्तु ॥ त्रयस्तु कुथुमेः पुत्रा औरसा सपराशराः (रसपासराः B. D.) । भागवित्तिश्च तेजस्वी त्रिविधाः कुथुमाः स्मृताः ॥ शौरिकः (शौरिद्युः C.) शृंगिपुत्रस्तु द्वावेतौ चरितव्रतौ । राणायनीयिः सौमित्रिः सामवेदविशारदौ ॥ प्रोवाच संहितास्तिस्रः शृंगिपुत्रो महातपाः । चैलः (चौल° C.) प्राचीनयोगश्च सुरालश्च (?) द्विजोत्तमाः ॥ प्रोवाच संहिताः षट् तु पाराशर्यस्तु कौथुमः । आसुरायणवैशाख्यौ वेदवृद्धपरायणौ ॥ प्राचीनयोगपुत्रश्च बुद्धिमांश्च पतंजलिः । कौथुमस्य तु भेदास्ते पाराशर्यस्य षट् स्मृताः ॥ लांगलिः शालिहोत्रस्तु (शालिगोत्रस्तु C.) स षट् प्रोवाच संहिताः । भालुकिः कामहानिश्च जैमिनिर्लोमगायिनिः (लोम° MSS.) ॥ कंदुश्च कोहलश्चैव षडेते लांगलाः स्मृताः । एते लांगलिनः शिष्याः संहिता यैः प्रसाधिताः ॥ ततो हिरण्यनाभस्य कृतिः शिष्यो (कृतशिष्यो MSS.) नृपात्मजः । सोऽकरोच्चतुर्विंशत्संहिता द्विपदां वरः ॥ प्रोवाच चैव शिष्येभ्यो येभ्यस्तान्वै निबोधत । राडुश्च (राडश्चन्मह° C.) महवीर्यश्च पंचमो वाहनस्तथा ॥ तालिकः (तालकाः B. तालकः D.) पांडकश्चैव कालिको राजिकस्तथा । गौतमश्चाजवस्तश्च सोमराजा यतकृतः (पतंजतः B. यतंततः D.) ॥ पृष्ठघ्नः परिकृष्टश्च उलूखलक एव च । यवीयसश्च वैशालो अंगुलीयश्च कौशिकः ॥ सालिमंजरिः सत्यश्च कापीयकानिकश्च यः । पाराशरश्च (परा° C.) धर्मात्मा इति क्रांतास्तु सामगाः ॥ सामगानां तु सर्वेषां श्रेष्ठौ द्वौ तु प्रकीर्तितौ । पौष्पिंजिश्च कृतिश्चैव संहितानां विकल्पकौ ॥ अथर्वाणं द्विधा कृत्वा सुमंतुरददाद्द्विजाः । कबंधाय गुरुः कृत्स्नं संचविद्या (sic C. सचविद्या B. D.) यथाक्रमं ॥ कबंधस्तु द्विधा कृत्वा पथ्यायैकं पुनर्ददौ । द्वितीयं वेदस्पर्शाय (वेददर्शाय Vishnup.) स चतुर्धाकरोत्पुनः ॥ मोदो[1] ब्रह्मबलश्चैव पिप्पलादस्तथैव च । शौल्कायनिश्च (शौष्कायनिश्च C. शौका° B. शोक° D.) धर्मज्ञश्चतुर्थस्तु यतः स्मृतः (चतुर्थः तपतः C.) ॥ वेदस्पर्शस्य चत्वारः शिष्यास्त्वेते दृढव्रताः । पुनश्च त्रिविधं विद्धि पथानां (पंथानां MSS.) भेदमुत्तमं ॥ जाजलिः कुमुदादिश्च तृतीयः शौनकः स्मृतः । शौनकस्तु द्विधा कृत्वा ददावेकं तु बभ्रवे ॥ द्वितीयां संहितां धीमान् सैंधवायनसंज्ञिते । सैंधवो मुंजकेशाय भिन्नां चास्य द्विधा पुनः ॥ नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः । चतुर्थोऽंगिरसः कल्पः शांतिकल्पश्च पंचमः ॥ श्रेष्ठा ह्यथर्वणो ह्येते संहितानां विकल्पनाः । षट्शः कृत्वा मया प्रोक्तं पुराणमृषिसत्तमाः ॥ आत्रेयः सुमतिर्धीमान्काश्यपो ह्यकृतव्रणः । भारद्वाजोऽग्निवर्चाश्च वसिष्ठो मित्रयुश्च यः ॥ सावर्णिः सौमदत्तिस्तु सुशर्मा शांशपायनः । एते शिष्या मम ब्रह्मन्पुराणेषु दृढ-

---

[1] Pro मोदो Vishnupuránae codd. haec: मौंदो A. मैत्रो D. मौञ्जो B. C.

व्रताः ॥ त्रिभिस्तिस्रः कृतास्तिस्रः संहिताः पुनरेव हि । काश्यपः संहिताकर्ता सावर्णिः शांशपायनिः ॥ सामिषा (सामिका D.) च चतुर्थी स्यात्सा चैषा पूर्वसंहिता । सर्वास्ता हि चतुष्पादाः सर्वाश्चैकार्थवाचिकाः ॥ पाठांतरे पृथग्भूता वेदशाखा यथा तथा । चतुःसाहस्रिकाः सर्वाः शांशपायनिकामृते ॥ लोमहर्षणिका मूला ततः काश्यपिका परा । सावर्णिका तृतीयासामृजुवाक्यार्थपंडिताः । शांशपायनिका चांत्या नोदनार्थ(निदाना°?)विभूषिता ॥ सहस्राणि ऋचामष्टौ षट्शतानि तथैव च । एताः पंचदशान्याश्च दशान्या दशभिस्तथा ॥ वालिखिल्याः ससप्रैषाः ससावर्णाः प्रकीर्तिताः । अष्टौ सामसहस्राणि सामानि च चतुर्दश ॥ आरण्यकं सहोमं च एतद्गायंति सामगाः । द्वादशैव सहस्राणि छंद आध्वर्यवं स्मृतं ॥ यजुषां ब्राह्मणानां च तथा व्यासो व्यकल्पयत् । सग्राम्यारण्यकं तत्त्वात्समंत्रकरणं तथा ॥ अतः परं कथानां तु पूर्वा इति विशेषणं । ग्राम्यारण्यं समंत्रं च ऋग्ब्राह्मणयजुः स्मृतं ॥ तथा हारिद्रवीयाणां खिलान्युपखिलानि तु । तथैव तैत्तिरीयाणां परक्षुद्रा इति स्मृतं ॥ द्वे सहस्रे शतन्यूने वेदे वाजिसनेयके । ऋग्गणः परिसंख्यातो ब्राह्मणं च चतुर्गणं ॥ अष्टौ सहस्राणि शतानि चाष्टौ अशीतिरष्टाभ्यधिकश्च पादः । एतत्प्रमाणं यजुषामृचां च सशुक्रियं सखिलयाज्ञवल्क्यं ॥ तथा चरणविद्यानां प्रमाणं संहितां शृणु । षट्सहस्रमृचामुक्तमृचः षड्विंशतिः पुनः ॥ एतावदधिकं तेषां यजुः कामं विवक्षति । एकादशसहस्राणि दश चान्या दशोत्तराः ॥ ऋचां दशसहस्राणि अशीतिं त्रिंशतानि च । सहस्रमेकं मंत्राणामृचामुक्तं प्रमाणतः ॥ एतावदृगुविस्तारमन्यच्चाथर्विकं बहु । ऋचामथर्वणां पंच सहस्राणीति निश्चयः ॥ सहस्रमन्यद्विज्ञेयमृषिभिर्विंशतिं विना । एतदंगिरसां प्रोक्तं तेषामारण्यकं पुनः ॥ इति संख्या प्रसंख्याता शाखाभेदास्तथैव च । कर्तारश्चैव शाखानां भेदहेतुस्तथैव च ॥ सर्वमन्वंतरेष्वेवं शाखाभेदाः समाः स्मृताः । प्राजापत्या श्रुतिर्नित्या तद्विकल्पास्त्विमे स्मृताः ॥ De vatum divinorum generibus, eorumque in singulis Manvantaris reditu. Desinit in hoc capite pars prior. 62 (fol. $155^{b}$). De Manvantaris et de creatione a Manubus singulis facta. De Prithuis Vainyae rebus gestis[1]. 63. De Prithuis prosapia. Dakshae origo. 64. Maríchae, Kaṣyapae filii, creatio. De Bhúr, Bhuvas, Svar mundis.

III. *Upodghátapáda.* 65 (fol. $164^{b}$). De Manuis Vaivasvatae creatione. De septem virorum sanctorum, creaturarum dominorum (Saptarshayas, Prajápatayas), origine, eorumque prosapia. 66. De Dharmae prole. Súta a viris sanctis interrogatus, quinam trium deorum praestantissimus esset, unum esse Deum respondit, eumque ad mundi creationem, conservationem, destructionem tres formas induisse (rájasí, sáttvikí, támasí tanús). Sicut enim adamas, quamvis unicolor, crystallo repercussus, varios colores exhiberet, ita Creatorem, in mundo se manifestantem, et unum esse et tergeminum. एकास्तन्वः स्मृता वेदे धर्मशास्त्रे पुरातने । सांख्ययोगपरैर्वीरैः पृथगेकार्थदर्शिभिः ॥ अभिजातप्रभावज्ञैर्ऋषिभिस्तत्त्वदर्शिभिः । एकत्वं च पृथक्त्वं च तास्तु भिन्नाः प्रजा इह ॥ इदं परमिदं नेति ब्रुवते भिन्नदर्शनाः । ब्रह्माणं कारणं केचित्केचित्प्राहुः प्रजापतिं ॥ केचिच्छिवं परत्वेन प्राहुर्विष्णुं तथापरे । अविज्ञानेन संसक्ताः शक्त्या रत्यादिचेतसः ॥ तत्त्वं कालं च देशं च कार्यं चावेक्ष्य तत्त्वतः । कारणं तु स्मृता ह्येते नानार्थे त्विह देवताः ॥ एकं प्रशंसमानस्तु सर्वानेव प्रशंसति । एकं निंदति यस्तेषां सर्वानेव स निंदति ॥ एकं यो वेत्ति पुरुषं तमाहुर्ब्रह्मवादिनं । अद्वेषस्तु सदा कार्यो देवतासु विजानता ॥ न शक्यमीश्वरं ज्ञातुमैश्वर्येण व्यवस्थितं । एकात्मा स त्रिधा भूत्वा संमोहयति यः प्रजाः ॥ Reliquos vero deos e tribus principalibus emanasse. 67. Duodecim dei, *Jaya* appellati, quum a Brahmane ad creationem propagandam geniti officium neglexissent, ea poena affecti sunt, ut usque ad finem Vaivasvata aevi renascerentur: ब्रह्मणो वै मुखात्सृष्टा जया देवाः प्रजेप्सया । सर्वे मंत्रशरीरास्ते स्मृता मन्वंतरेष्विह ॥ दर्शश्च पौर्णमासश्च बृहच्च रथंतरं । आकूतः प्रथमस्तेषां ततः स्वाकूतिरुच्यते ॥ चित्तिश्चैव सुचित्तिश्च आकूतिः कूतिरेव च । अधीतिश्च (अधीष्टश्च C. D.) ततो ज्ञेय आधीतिश्चैव (अधी° C. D.) तत्त्वतः । विज्ञातिश्चैव विज्ञातो मनवो ये च द्वादश ॥ Quare deinceps Ajita, Tushita, Satya, Hari, Vaikuṇṭha, Sádhya, Áditya nominibus oriuntur. De gigantum et Marutum origine. 68. De Danuis prosapia. 69. Minorum gentium dei, velut Gandharvae, Apsarae, Yakshae, et animalia enumerantur. 70. Regum institutio. Vatsárae (Vatsara B.) et Asitae, Kaṣyapae filiorum, proles. Reliquorum creationis dominorum filii. 71 (fol. $196^{a}$)–82. De manium cultu praecepta, a Brihaspati cum Ṣamyu filio communicata. 83 (fol. $223^{b}$)–95. Regum historia. Sed in codice nostro in folio $231^{a}$. l. 10. lacuna quam maxima exstat. Omnia enim desiderantur, quae in cod. C. fol. २६२–३०३. leguntur.

---

[1] In hoc capite Sútae et Mágadhae origo narratur. Atque de Súta eadem verba, quae in prooemio leguntur, de Mágadha vero haec: तस्मिन्नेव समुत्पन्ने पुनर्जज्ञे तु मागधः । सामगेषु तु गायत्सु सुग्भांडे वैश्वदेविके । समागते समुत्पन्नस्तस्मान्मागध उच्यते ॥ Uterque quomodo praecones instituti sint, ita refertur: पृथोः स्तवार्थं तौ तत्र समाहूतौ महर्षिभिः । तावूचुर्मुनयः सर्वे स्तूयतामेष पार्थिवः ॥ कर्मैतदनुरूपं च पात्रं चायं नराधिपः । तावूचतुस्तदा सर्वांस्तानृषीन्सूतमागधौ ॥ आवां देवानृषींश्चैव प्रीणयावः स्वकर्मभिः । न चास्य कर्म वै विद्मो न तथालक्षणं यशः ॥ स्तोत्रं येनास्य कुर्याव राज्ञस्तेजस्विनो द्विजाः । ऋषिभिस्तु नियुक्तौ तु भविष्यैः स्तूयतामिति ॥ दानधर्मरतो नित्यं सत्यवाक्संजितेंद्रियः । ज्ञानशीलो वदान्यस्तु संग्रामेष्वपराजितः ॥ यानि कर्माणि कृतवान्पृथुश्चापि महाबलः । तानि शीलेन बद्धानि स्तुवद्भिः सूतमागधैः ॥ ततः स्तवांते सुप्रीतः पृथुः प्रादात्प्रजेश्वरः । अनूपदेशं सूताय मगधान्मागधाय च ॥ तदा (ततो?) वै पृथिवीपालाः स्तूयंते सूतमागधैः । आशीर्वादैः प्रबोध्यंते सूतमागधवंदिभिः ॥ Cf. Vishṇupuráṇa I, 13. quod caput etiam in ceteris rebus cum nostro consentit.

IV. *Upasanhára.* 96 (fol. 244[a]). De Manvantaris futuris. De mundi dissolutione et restitutione. De temporis computatione. 97. De septem mundis eorumque praesidibus. De locis inferis. Ṣivae coelum celebratur. 98, 99. De numinis summi cognitione.

Codex hujus seculi initio negligenter exaratus est. (Wilson 120.)

---

## 105.

Lit. Devan. Charta Ind. Foll. 403. Long. 11¼. Lat. 4¾. Linn. 10.

*Váráhapuráṇam,* a Vishṇu, verris formam gerente, cum Terra communicatum. (A.) Incipit: नमस्तस्मै वराहाय लीलयोद्धरते महीं । खुरमध्यगतो यस्य मेरुः खणखणायते ॥१॥ दंष्ट्राग्रेणोद्धृता गौरुदधिपरिवृत्ता (l. °वृता) पर्वतैर्निम्नगा[f]भ स्तोकं मृत्पिंडवत्प्राग्बृहद्गुरुवपुषानंतरूपेण (l. bṛihaduru) येन ॥२॥ सो यं कंसासुरारिर्मुरन[र]कदशास्यांतकृत्सर्वसंस्थः । कृष्णो विष्णुः सुरेशो नुदतु मम रिपूनादिदेवो वराहः ॥३॥ सूत उवाच ॥ यस्मिन्काले क्षितिः पूर्वं वराहवपुषा तु सा । उत्धृता विष्णुना शक्ता (l. ṣaktyá) जगाद परमेश्वरं ॥४॥ धरण्युवाच ॥ कस्य कल्पे भवानैव मां समुद्धरते विभोः । न चाहं वेद ते मूर्तिं मादिसर्गां च केशव ॥५॥ वेदेषु चैव नष्टेषु मत्स्यो भूत्वा रसातलं । प्रविश्य तांस्तथोत्कृष्य ब्रह्मणे दत्तवानसि ॥ अन्यासुरासुरमयं त्वं समुद्रस्य मंथने । वृत्तवानसि (धृतवानसि B.) कौर्म्येण मंदरं मधुसूदन ॥७॥ पुनश्च गां जगन्नाथ निमज्जंति (l. nimajjantím) रसातलात् । उज्जहारैकदंष्ट्रेण भगवान्वै महार्णवान् (°t) ॥८॥ अन्यद्धिरण्यकशिपुर्वरदानेन दर्पितः । आबाधमानः पृथिवीं स त्वया विनिपातितः ॥९॥ (बलिस्तु बद्धो भगवंस्त्वया वामनरूपिणा ।)[1] पुनर्निःक्षत्रिया देव त्वया चापि पुरा कृता ॥१०॥ जामदग्न्येन रामेण त्वया भूत्वा सकृत्प्रभो(:) । पुनश्च रावणो रक्षः क्षपित[:] क्षात्रतेजसा ॥११॥ बलिः प्रबद्धो भगवन्स्त्वया वामनरूपिणा । न च जानामहं (°námy aham) देव तव किंचिद्विचेष्टितं । उधृत्य मां कथं सृष्टिं सृजसे किं च कारणं ॥ संकृष्ये च कृत्वा तं कारणं (सकृद्ध्रियेत कृत्वा च पाल्यते चापि केन वा B.) । केन वा सुलभा देवा सृजन्ता सता सततं विभो ॥ कथं च सृष्टेरादि स्यादवशानं कथं भवेत् । कथं युगस्य गणना संस्था स्यातु चतुर्युगं ॥ के वावस्था महेश्वरः (को वा विशेषो तेष्वस्मीं का वा संस्था महेश्वरी B.) । तन्वानः (यज्वानः B.) के च राजानः केन सिद्धिं परां गताः ॥ एतत्सर्वं समासेन कथयास्व प्रसीद मे । इत्युक्ता क्रोधरूपेण (ity uktaḥ kroḍarúpeṇa) जहास परमेश्वरः ॥ हसतस्तस्य देवस्य वदने साक्षैन्निती वसवः (l. हसतस्तस्य कुक्षौ तु जगद्धात्री) ददर्श ह । रुद्रान्देवान्सहवसुसिद्धसंघोन्महर्षिभिः ॥ सचंद्रसूर्येग्र(I)हसप्तलोकानंत[:]स्थिताभाव उपातधर्म्मान् । इतिदशं (पती) पश्यति सा समस्तं त्वत्तावत्स्थिति सर्वेपितात्सर्वगात्ता (यावत्स्थितिर्वेपितसर्वगात्ता B.) ॥ उन्मीलितास्यस्तु यदा महात्मा पृष्टो धरण्यामलसर्वगात्ता । तावत्स्वरूपेण चतुर्भुजेन महोदधौ सप्तमथान्वपश्यत् (suptam etc.) ॥ शेषपर्यंकशयने स्तुत्यं देवं जनार्दनं । दृष्ट्वा तंनाभिपंकोत्थमंतस्तं च चतुर्भुजं । कृतांजलिपुटा देवी स्तुतिं धात्रि (dhátrí) जगाद ह ॥ धरण्युवाच ॥ नमः कमलपत्राक्ष नमस्ते पीतवाससे । नमः सुरारिविध्वंसकारिणे परमात्मने ॥ शेषपर्यंकशयने धृतवक्षस्स्थलाश्रये (dhṛitavakshaḥsthalaṣriye) । नमस्ते सर्वदेवेश नमस्ते मोक्षकारिणे ॥ नमः शार्ङ्गासिचक्राय जन्ममृत्युविवर्जिते (°jita) । नमो नाभ्योस्थित(l. नाभ्युत्थित)महाकमलासनजन्मने ॥ नमो विद्रुमरक्ताय पाणिपल्लवशोभिते (°ne) । शरणं त्वां प्रपन्नास्मि त्राहि तारिमनागसं (l. nárím) ॥ पूर्णां नीलांजनाकारं व[I]राहं ते जनार्द्दनं । दृष्ट्वा भीतास्मि भूयोपि जगत्वदिहगोचरं (जगस्त्वद्देहगोचरं) ॥ इदानीं कूरु मे नाथ दयां त्राहि महाभयात् । केशवः पातु मे पादौ जंघे नारायणो मम ॥ माधवो मे कटिं पातु गोविंदो गुह्यमेव च । नाभिं विष्णुस्तु मे पातु उदरं मधुसूदनः ॥ उ(द)रस्त्रिविक्रमः पातु हृदयं पातु वामनः । श्रीधरः पातु मे कंठं हृषीकेशो मुखं मम ॥ एवं न्यस्य हरेर्न्यासं नामानी (°ni) जगती तदा । नमस्ते भगवन् विष्णोरित्युत्का वीरराम ह (भगवन्विष्णो इत्युक्ता वि°) ॥१॥

Cf. Wilson, Vishnupurána, p. xliv. Cap. 1. Prooemium. 2. De creatione. Sávitrí dea Vedas tres complectitur. 3. Nárada coram Priyavrata, quae in vita priore sibi accidissent, enarrat. 4. De Náráyaṇae formis variis. Aṣvaṣiras rex a Kapila et Jaigíshavya, Vishṇum esse omniformem, edocetur. 5. Animae a metempsychosi liberatio ita obtinetur, si opera, numinis cognitione respecta, fiant. यत्किंचित्कुरुते कर्म पुरुषः साध्वसाधु वा । सर्वं नारायणे न्यस्य कुर्वन्नेव न लिप्यते ॥ et infra: एवं ज्ञानं भवेत्कर्म कुर्वतोऽपि स्वजातिकं भवेन्मुक्तिः etc. 6. Vasu, Káṣmíriae rex, Pushkarae Vishṇum, Puṇḍaríkákshae formam gerentem, celebrat, ibique quae a se in vita priore gesta essent certior fit. 7. Gayae sanctitas Raibhyae rebus gestis narratis celebratur. 8. Narratio de venatore quodam pio, cujus jam in cap. 6. mentio injecta est. 9. De creatione a Náráyaṇa aevo aureo facta. 10. De Durjayae, Supratíkae regis filii, rebus gestis. 11 (fol. 26[b] = B. 14[a])–12. Durjaya quum Gauramukhae anachoretae gemmam magicam eripere voluisset, Vishṇuis potentia coercetur. 13, 14. Gauramukhae cum Márkaṇḍeya de manium cultu colloquium, Prabhásae habitum. 15. Gauramukha Vishṇu celebrato cum numine conjungitur (layam jagáma). 16. Indra quum bobus sacrificaturus esset (gomedha), vaccae a Vidyut et Suvidyut Asuris abreptae sunt. Quas quum Saramá quaesivisset, lactis dono corrupta est, quum vero ab Indra vapularet, lac evomuit, et in Asurarum latebras confugit, et hoc modo vaccae ab Indra repertae sunt[2]. Quantum,

[1] Scribae errore hic versus ex iis, quae infra leguntur, repetitus est.

[2] Eadem ratione mythus in Bṛihaddevatá libro narratur. Cf. Kuhn, in Haupt Zeitschrift, VI, 121.



Digitized by Google

eheu, haec narratio a pulcherrimo illo Ṛigvedae (X, 108) carmine distat! 17–36. Prajápálae regis cum Mahátapase anachoreta de deorum origine colloquium. 17. A Vishṇu deos omnes esse creatos, narratione, Bṛihadáraṇyakae nimis simili, probatur: deos nimirum singulos quosque, quo suas esse in mundo partes summas demonstrarent, corpus priscum illud genitale (prájápatyam ṣaríram) reliquisse, idque tamen viguisse (na ṣíryate). 18, 19. Agnis origo. 20. Aṣvinum origo. 21 (fol. $48^{a}$ = B. $26^{a}$). 22. Gauris deae origo. 23. Gaṇeṣae origo. 24. Serpentium origo. 25. Kárttikeyae origo. 26. Solis origo. 27. Ṣiva quum cum Andhaka pugnaret, matres mysticae eorumque proles ortae sunt. 28. Ad Vaitrásuram occidendum Máyá Durgae formam induit. 29. Regionum origo. 30. Kuverae origo. 31 (fol. $68^{a}$ = B. $37^{b}$). Numen summum ipsum, quo creationem tueretur, Vishṇuis forma se manifestavit. 32. Dharmae origo. 33. Rudrae origo. 34. Manium origo. 35. Somae dei origo. 36. Tandem Prajápála rex, se aevo aureo Suprabha nomine regem fuisse certior factus, Vishṇu celebrato diem supremum obit. 37. Venator quidam, Áruṇis anachoretae majestate permotus, vita scelesta relicta Vishṇuis cultor evadit. 38. Idem a Durvásase libros sacros edocetur. Jam variae cerimoniae enumerantur. 39. Matsyadvádaṣívratam (Márgaṣire máse). 40. Kúrmadvádaṣívratam (Paushe). 41. Váráhadvádaṣívratam (Mághe, site paxe). 42. Narasinhadvádaṣívratam (Phálgune, s. p.). 43. Vámanadvádaṣívratam (Chaitre, s. p.). 44. Jámadagnyadvádaṣívratam (Vaiṣákhe). 45. Rámadvádaṣívratam (Jyeshṭhe). 46. Kṛishṇadvádaṣívratam (Áshádhe). 47. Buddhadvádaṣívratam (Ṣrávaṇe, s. p.). Kalkidvádaṣívratam (Bhádrapade, s. p.)[1]. 48 (fol. $79^{a}$ = B. $50^{b}$). Padmanábhadvádaṣívratam (Áṣvayuje, s. p.). 49. Kárttikadvádaṣívratam. 50–68. Agastyae cum Bhadráṣva Ṣvetaváhana rege colloquium (Agastyagítás). 50–52. De Paṣupála rege narratio, *παραβολικῶς* explicanda. 53. Bhartṛipráptivratam (vasante ṣuklapakshe dvádaṣyám). 54. Ṣubhavratam (Kárttikadvádaṣyám). 55. Dhanyavratam (मार्गशीर्षे सिते पक्षे प्रतिपद्या तिथिर्भवेत्). 56. Kántivratam (Kárttikasya dvitíyáyám site dine). 57. Saubhágyavratam (incipit Phálgunasya tṛitíyáyám ṣukle pakshe). 58. Avighnavratam (Phálgunasya chaturthyám). 59. Ṣántivratam (Kárttikasya panchamyám ṣ. p.). 60. Kámyavratam (Paushasya shashṭhyám ṣ. p.). 61 (fol. $92^{a}$ = B. $58^{a}$). Árogyavratam. 62. Putrapráptivratam (Bhádrapadasyáshṭamyám kṛishṇe p.). 63. Ṣauryavratam (Áṣvayujasya navamyám). 64. Sárvabhaumavratam (Kárttikasyáshṭamyám ṣ. p.). 65. Huic capiti Náradapuráṇasúchanam titulus subscriptus est. Neque temere. Vishṇus enim Náradam, devotionis instrumenta percunctantem, his alloquitur: अलाभे वेदशास्त्राणां पंचरात्रोदितेन हि । मार्गेण मां यजंते ये ते मां प्राप्स्यंति नारद ॥ ब्राह्मणक्षत्रियविशां पंचरात्रं विधीयते । शूद्रादीनां तु (न?) तच्छ्रोत्रपदवीमुपयास्यति ॥ एवं मयोक्तं विप्रेंद्र पुराकल्पे पुरातनं । पंचरात्रसहस्राणां यदि कश्चिद्ग्रहिष्यति ॥ कर्म क्षयेच्च मां कश्चिद्यदि भक्तो भविष्यति । तस्य वेदं पंचरात्रं नित्यं हृदि वसिष्यति ॥ इतरे राजसैर्भावैस्तामसैश्च समावृताः । भविष्यंति द्विजश्रेष्ठ मच्छासनपराङ्मुखाः ॥ कृतं त्रेता द्वापरं च युगानि त्रीणि नारद । सत्त्वस्थानं गमिष्यंति कली रजस्तमोधिकः ॥ अन्यच्च ते वरं दद्मि शृणु नारद सांप्रतं । यदिदं पंचरात्रं मे शास्त्रं परमदुर्लभं ॥ तद्भवान्वेत्स्यते सर्वं मत्प्रसादान्न संशयः । वेदेन पंचरात्रेण भक्त्या यज्ञेन च द्विज । प्राप्योऽहं नान्यथा वत्स वर्षकोटिशतैरपि ॥ 66. Parabolae supra laudatae explicatio. 67. De ordinum commercio prohibito (agamyágamanam). 68. Agastya miraculum, quod ipsi olim evenit, refert. 69–88. Agastya colloquium repetit, quod Rudra olim secum habuisset (Rudragítás). 69. Vishṇuis majestas celebratur. 70. Rudra quum Creatorem unicum esse, at trifaria forma se manifestare declarasset[2], a viris sanctis interrogatus, cur igitur institutiones ipsi proprias revelasset, haec ait: Gautamam olim in Daṇḍaka silva fame exorta magnum anachoretarum numerum sustentasse. Cui infensus quum Ṣáṇḍilya vaccam veneficio factam in segetes immisisset, eam a Gautama occisam esse. Quo facto anachoretas omnes eremum reliquisse, non aliter scelus illud expiari posse declarantes, nisi vacca illa Gangis aqua in vitam revocaretur. Gautamam id quidem austera devotione effecisse, at, quum insidias sibi structas esse comperisset, anachoretas illos exsecratum esse, ut per omne aevum coma promissa, cinere cooperti, falsa pietatis specie degerent, librorumque sacrorum expertes essent. Horum in usum se postmodum novum institutionum codicem revelasse: भवितारो द्विजोत्तमाः ॥ कलौ त्वद्रूपिणः सर्वे जटामुकुटधारिणः । स्वेच्छया प्रेतवेषाश्च मिथ्या लिंगधराः प्रभो ॥ तेषामनुग्रहार्थाय किंचिच्छास्त्रं प्रदीयतां । ये चास्मद्वंशजाः सर्वे वर्तेयुः कलिपीडिताः ॥ एवमभ्यर्थितस्तैस्तु पुराहं द्विजसत्तमाः । वेदक्रियासमायुक्तां कृतवानस्मि संहितां ॥ निःश्वासाख्यां ततस्तस्यां लीना बाभ्रव्यशांडिलाः । अल्पापराधाच्छ्रुत्यैव गता वैद्दालिकाभवं (गतास्ते दांभिकं भवन् B.) ॥ मयैव मोहितास्ते तु भविष्यं जानता द्विजाः । लौल्यार्थिनः स्वशास्त्राणि करिष्यंति कलौ नराः ॥ निःश्वाससंहिता या (यां MSS.) हि लक्षमात्रं प्रमाणतः । सैव पाशुपती दीक्षा योगः पाशुपतस्तथा ॥ एतस्माद्वेदमार्गाद्धि यदन्यदिह जायते । तत्क्षुद्रकर्म विज्ञेयं रौद्रं शौचविवर्जितं ॥ ये रुद्रमुपजीवंति कलौ वैद्दा-

[1] Capita 39—47. in codice A. desiderantur.

[2] यज्ञेऽस्मिन्यद्धुतं हव्यं मामुद्दिश्य महर्षयः । ते त्रयोऽपि समं भागं गृह्णीमः सुरसत्तमाः ॥ नास्माकं विविधो भावो वर्तते मुनिसत्तमाः । सम्यग्दृशः प्रपश्यंति विपरीतेष्वनेकशः ॥

Digitized by Google

